## २३. मातापुत्र्योः सम्भाषणम्

भूतकृदन्त-एकवचनरूपाणि (स्त्री०)

विजया - अम्ब ! अहम् आगतवती।

अम्बा - विजये किमर्थं विलम्बः ?

विजया - अद्य विद्यालये कोऽपि कार्यक्रमः आसीत्। तत्र भागं स्वीकृतवती।

अम्बा - भवती किं कृतवती ?

विजया - अहं गीतं गीतवती।

अम्बा - एवं ......? अध्यापिका किम् उक्तवती ?

विजया - अध्यापिका सर्वान् श्लाघितवती। किन्तु राधा कोलाहलं कृतवती। ताम् एका तर्जितवती। सा रुदितवती।

अम्बा - अनन्तरम्......... ।

विजया - परह्यः स्पर्धा आसीत् किल ? तत्र नलिनी जयं प्राप्तवती। मुख्याध्यापिका पारितोषिकं दत्तवती। वयं तत् दृष्टवत्यः।

अम्बा - भवतु, किमर्थं विलम्बः ? तत् न उक्तवती।

विजया - अहं तावत्पर्यन्तं घटीमेव न दृष्टवती। समयमेव न ज्ञातवती। अतः विलम्बः।

अम्बा - भवतु, अहम् अद्य मधुरं कृतवती। ददामि, भवती खादतु।